श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
यादवाभ्युदये महाकाव्ये

# ॥ दशमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ दशमः सर्गः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

ततस्तौ ददृशुस्तत्र विशन्तौ राजवीथिकाम्।
पूर्णदृष्टिफलाः पौराः पुण्यैरेकमुखैरिव॥ **10.1** ॥

चक्षुषामिव भाग्येन सम्प्रवृत्तौ महोत्सवौ।
युक्तौ मदनशक्त्येव युगपन्मधुमाधवौ॥ **10.2** ॥

अभिख्यावीचिविक्षेपैः अपृथग्भावचित्रितैः।
समेतैरनुभावाद्यैः सक्ताविव रसोत्तमौ॥ **10.3** ॥

क्रममुल्लङ्घ्य भूतानां भोगमोक्षाविवोद्गतौ।
तयोरेव विनिष्पत्त्यै धर्माविव च तादृशौ॥ **10.4** ॥

पुनन्तौ भुवनं पादैः पुष्पवन्ताविवापरौ।
सिञ्चन्तौ कान्तिवर्षेण सितकृष्णाविवाम्बुदौ॥ **10.5** ॥

मदोपक्रमदुर्दान्तौ मधुरोद्धतविभ्रमौ।
कलभाविव सन्नद्धौ कंसादिनलमर्दने॥ **10.6** ॥

शुभानामिव सीमन्तैः श्रुतिसीमन्तसेवितैः।
पुनन्तौ राजविशिखां पुण्यैश्चरणपङ्कजैः॥ **10.7** ॥

शीलसंवृतपारम्यैः शृङ्गारपरिकर्मितैः।
दृषदोऽपि द्रवीभावं नयन्तौ दिव्यचेष्टितैः॥ **10.8** ॥

दिदृक्षादत्तदृष्टीनां मनस्कारमनीषयोः।
सपीतिरससंतोषं दिशन्तौ देहकान्तितः॥ **10.9** ॥

मन्मथायुतसौन्दर्यौ वसन्तायुतसौरभौ।
शशाङ्कायुतलावण्यौ चण्डरश्म्ययुतद्युती॥ **10.10** ॥

चित्रतामिव नीतानां चित्तचेष्टापहारतः।
प्रतिसौधं पुरस्त्रीणां निर्विशन्तौ निरीक्षणम्॥ **10.11** ॥

सुप्रभातमिह प्राप्तं सूषा च सुदिनं च नः।
इति वादिभिरन्योन्यं द्रुतचित्तैरनुद्रुतौ॥ **10.12** ॥

बलादपहृतैस्तत्र रजकाद्राजसम्मतात्।
परभागश्रियं प्राप्तौ वासोभिरसितारुणैः॥ **10.13** ॥

लब्धपुण्यविपाकेन मालाकारेण लम्भितैः।
शबलौ दामभिश्चित्रैः संदिग्धनवमालिकैः॥ **10.14** ॥

कान्तिनिर्जितया कामात् प्रदिष्टैः कंसकुब्जया।
दधतौ वर्णकैर्भूयो दिव्यगन्धौ सुगन्धिताम्॥ **10.15** ॥

ऋजूकृतसुजाताङ्ग्या ऋजुबुद्ध्याऽथ कुब्जया।
प्रणयन्त्या स्वगेहाप्तिं प्राप्तमन्दस्मितौ मिथः॥ **10.16** ॥

ततो विविशतुः शालां बलिसद्मगुहामिव।
प्रथितां पृथुभिश्चापैः पन्नगैरिव भीषणैः॥ **10.17** ॥

तत्र शैलनिभं शौरिः त्रिदशैरपि दुर्दमम्।
ददर्शाजगवप्रख्यं दम्भोलिकठिनं धनुः॥ **10.18** ॥

स्वपूर्व प्रभवोदन्तम् इदानींतनयन्निव।
तदानम्य धनुर्भीमं बभञ्ज भुजलीलया॥ **10.19** ॥

महता तस्य घोषेण विदद्रे द्विषतां मनः।
सौधानि मधुरायाश्च शुष्काशनिविडम्बिना॥ **10.20**॥

चापगोपचमूं हत्वा तौ जगद्धितमानुषौ।
अतिलङ्घ्य धनुःशालां रङ्गद्वारमवापतुः॥ **10.21**॥

तत्र मृत्युमिव क्रुद्धं निदध्यतुररिंदमौ।
नागं कुवलयापीडं निह्नुवानमिवाम्बरम्॥ **10.22**॥

तमासाद्य द्रुतं शौरिः त्रासितत्रिदशद्विपम्।
पञ्चवक्त्र इवाक्रम्य पातयामास भूतले॥ **10.23**॥

तस्य दन्तौ समुद्धृत्य श्वेताद्रिशिखरोपमौ।
विदधाते यदुश्रेष्ठौ मल्लयुद्धमहायुधे॥ **10.24**॥

सह गोपैरधिष्ठाय रङ्गमध्यमरिंदमौ।
बलिजिद्बलभद्रश्च बालवृत्तैरदीव्यताम्॥ **10.25**॥

नृपोपहूतैरथ तौ विहारैक्यमवापतुः।
नर्मकारकजल्पाक नटनर्तकगायकैः॥ **10.26**॥

जनस्य महतस्तत्र जनयामासतुस्तदा।
महता कान्तिवर्षेण दिदृक्षां देवमातृकाम्॥ **10.27**॥

उपवेदमधीयुर्ये रणार्थं रङ्गदर्शिनः।
तमेव ते द्विधाभूतं तावुभावभिमेनिरे॥ **10.28**॥

तदालोकनलाभेन सामाजिकजनस्तदा।
अनिदम्पूर्वमाह्लादमपवृक्त इवान्वभूत्॥ **10.29**॥

बिम्बिताकृतयो नार्यस्तद्देहमणिदर्पणे।
तत्परिष्वङ्गनिर्वेशम् अयत्नादिव लेभिरे॥ **10.30**॥

गीतमञ्जुगिरस्तत्र नृत्तसंवादिविभ्रमाः।
मञ्चेषु हरिरद्राक्षीत् वरस्त्रीर्मदिरेक्षणाः ॥ **10.31** ॥

धृतहेतिपरिष्कारान् धीरोद्धतविलोकितान्।
ददर्श पृथिवीपालान् देवानिव दिवश्च्युतान् ॥ **10.32** ॥

तमसामिव सङ्घातं समाहारमिवैनसाम्।
तुङ्गमञ्चगतं कंसं तुष्टो हरिरवैक्षत ॥ **10.33** ॥

ललितारम्भया वृत्त्या रङ्गभाजां रसावहा।
नरवृत्तान्तविहृतिः ववृधे रामकृष्णयोः ॥ **10.34** ॥

विदधे सिंहनादेन तारेण यदुसिंहयोः।
गर्जितं दैत्यमल्लानां गोमायुगणवाशितम् ॥ **10.35** ॥

तावुभौ डिम्भवपुषौ ख्यातवीर्यपराक्रमौ।
चाणूरो मुष्टिकश्च द्वौ नियोद्धुमभिजग्मतुः ॥ **10.36** ॥

अहो महदुपक्रान्तम् अत्याहितमिदं यतः।
अशिक्षितरणौ बालौ मल्लयुद्धे नियोजितौ ॥ **10.37** ॥

शिरीषललितैरङ्गैः चेष्टितैरपि पेशलैः।
अद्रिसारकठोराभ्यां कथं योद्धुमिमौ स्थितौ ॥ **10.38** ॥

पश्यद्भिरवशैर्नूनं पौरजानपदैर्जनैः।
पापमेतदनुज्ञातं परपिण्डपरायणैः ॥ **10.39** ॥

मधुकैटभदुर्दान्तौ मल्लबृन्दारकाविमौ।
यदि जेष्यति यः कश्चित् स किं न पुरुषोत्तमः ॥ **10.40** ॥

अथवा पूतनादीनाम् अप्रयत्नेन घातुकौ।
नियुद्धे मल्लमुख्येभ्यो नालमेतौ न वा कथम् ॥ **10.41** ॥

जनवादमिमं शृण्वन् जातहासो जनार्दनः।
भुजमास्फोटयामास भूभारहरणे क्षमम्॥ **10.42** ॥

तदास्फोटितशब्देन स्फुटत्कर्णस्य भूयसा।
कंसमल्लगणस्यासीत् कथा गोपालकाश्रया॥ **10.43** ॥

गोपयुद्धधिया जिह्रत् चाणूरः कूणितेक्षणः।
पुष्पपेषमिवोत्पश्यन्नाद्रवत्पुष्करेक्षणम्॥ **10.44** ॥

यथोचे विषमं तत्र नियुद्धं स्थूलदृष्टिभिः।
तत्त्वदृष्टिभिरप्येवं विश्वाधिकबले हरौ॥ **10.45** ॥

न्यूनाधिकसमारम्भो विभुस्तत्र विहारतः।
विषादप्रीतिसंदेहान् सभ्यानां समतानयत्॥ **10.46** ॥

स बालः प्रचयं प्राप बालातप इव क्रमात्।
नीहार इव चाणूरः शनैरपचयं ययौ॥ **10.47** ॥

वारितेष्वथ वाद्येषु विषण्णेन महीभृता।
दिव्यदुन्दुभयो नेदुर्निगमध्वाननिर्भराः॥ **10.48** ॥

वल्गता बलभद्रेण कृष्णेन च वसुंधरा।
वादित्रमिव दध्वान मथुरेन्द्रभयानकम्॥ **10.49** ॥

भीमकालियभोगीन्द्रस्फटारङ्गमहानटः।
मल्लरङ्गनटं दैत्यं मधुमाथं ममाथ सः॥ **10.50** ॥

मुष्टिघातेन रामस्य मुष्टिकश्च निपातितः।
भोजाधिपमहोत्पातं भूमिकम्पमवर्तयत्॥ **10.51** ॥

रामरामानुजाभ्यां तौ रावणेन्द्रजिताविव।
नमयामासतुः पृथ्वीं नगपातं निपातितौ॥ **10.52** ॥

शायितौ वीरशयने दृष्ट्वा चाणूरमुष्टिकौ।
द्रुतमभ्यद्रवन्कृष्णं तत्र तोसकलादयः॥ **10.53** ॥

स तानपि नियुद्धेन वसुधायां न्यपातयत्।
कालो युगपदुद्भूतान् कल्पान्तमिहिरानिव॥ **10.54** ॥

गरुत्मानिव भूभागाद्गगनाभोगमायतम्।
कंसमञ्चमपद्वारादुदप्लवत केशवः॥ **10.55** ॥

कचग्रहेण विवशं कंसमाकृष्य पातयन्।
पतन्वक्षःस्थले तस्य तत्सत्त्वमुदपाटयत्॥ **10.56** ॥

महामोहमिवाक्रम्य मातुलं मधुसूदनः।
विवेक इव वृत्तस्थमुग्रसेनममोचयत्॥ **10.57** ॥

ददौ च कंसभृत्यानां ददतां तत्र जीवितम्।
उन्मुखत्रिदशप्रेक्ष्यामूर्ध्वां गतिमनुत्तमाम्॥ **10.58** ॥

कंसकर्षणमण्डल्यो गम्भीरास्तत्र चक्रिरे।
रणलक्ष्मीनिवासस्य रङ्गस्य परिखा इव॥ **10.59** ॥

सुदामनामा कंसस्य सोदरस्त्वरितः क्रुधा।
बलेन गमितः क्षिप्रमग्रजेन गतां गतिम्॥ **10.60** ॥

अनायुधमहायुद्धं दृष्ट्वा हृषितरोमभिः।
प्रवातकदलप्रख्यैः प्राश्निकैरभितः स्थितम्॥ **10.61** ॥

कृतिनस्तादृशं युद्धं किलिकिञ्चितयन्त्रिताः।
लीना इव च पश्यन्तो लिखिता इव चाभवन्॥ **10.62** ॥

सिद्धाश्च दिवि तत्तादृक्तालकल्पितताण्डवाः।
हर्षदुग्धाब्धिकल्लोलं हाहाकारमकल्पयन्॥ **10.63** ॥

अथ तौ भीमदोर्दण्डकण्डूकर्षणतोषितौ।
पितृभ्यां दृष्टजन्याभ्यामुपसृत्य प्रणेमतुः ॥ **10.64** ॥

तौ च तौ मृदितारातिरक्तचन्दनरञ्जितौ।
अश्रुभिः प्रीतिनिष्यन्दैः पितरावभ्यषिञ्चताम् ॥ **10.65** ॥

विबुधत्वमिव प्राप्तो वसुदेवः सुतेक्षणात्।
सतत्त्वप्रतिबोधेन सात्त्वतां पतिमस्तुत ॥ **10.66** ॥

नमस्ते नाभिनालीकरजसा सृष्टवेधसे।
अजाय सर्ववेदानामेकवेद्याय विष्णवे ॥ **10.67** ॥

अनन्याधारमाधारमनन्येश्वरमीश्वरम्।
अनुशृण्वन्ति सन्तस्त्वामनन्याधिपतिं पतिम् ॥ **10.68** ॥

अभङ्गुररसं भोग्यमनपायं रसायनम्।
अक्षयं धर्मसर्वस्वमविदुस्तव कीर्तनम् ॥ **10.69** ॥

अनुग्रहदशादीप्तमशेषार्थप्रकाशकम्।
दयासम्प्लुतमाहुस्त्वां दीपमन्तस्तमोपहम् ॥ **10.70** ॥

देवकी दनुजस्थूणा दिव्यं धाम व्रजाङ्गणम्।
रमा राधादयश्चेति राशिभेदैर्न भिद्यसे ॥ **10.71** ॥

नियन्ता सर्वभूतानां नियन्तव्यैर्नियम्यसे।
पितामहमुखैः पुत्री मम पुत्रोऽसि मायया ॥ **10.72** ॥

महता त्वत्पदेनैव मारुतिन्यायमाश्रिताः।
निस्तरन्त्यचिरात्सन्तो दुस्तरं भवसागरम् ॥ **10.73** ॥

अहितोदन्वदौर्वाग्निमशेषोत्कर्षमातरम्।
भवभैमरथीं भक्तिं भजन्ति त्वयि साधवः ॥ **10.74** ॥

भरन्यासाश्वयुक्तेन भाववेगप्रधाविना।
मनोरथेन गन्तव्यः सारथिश्च भवान् सताम्॥ **10.75**॥

वयं तु भवता ग्राह्या वासनादुर्गभेदिना।
मनागिव समुद्बोध्य मा पुनर्मूमुहद्भवान्॥ **10.76**॥

महतामपि निष्कम्पा मनुष्यत्वमतिस्त्वयि।
दृढलक्षितचिह्नानां दिङ्मोह इव दुर्दमः॥ **10.77**॥

दुरन्तसुखखद्योतं दुःखान्धतमसावृतम्।
निजेनैव प्रकाशेन निशीथमुपरुन्धि नः॥ **10.78**॥

मशकानिव मातङ्गः कंसमुख्यानिमान्क्षिपन्।
यदि विस्मयनीयस्त्वं विस्मये किं न विस्मयः॥ **10.79**॥

नखलीलाविदार्येषु नाथेषु विबुधद्विषाम्।
परिष्करणपर्यायाः पञ्चापि तव हेतयः॥ **10.80**॥

कालनेमिविकारेऽस्मिन् कंसे विमथिते त्वया।
ईदृशामितरेषां च दत्त एव जलाञ्जलिः॥ **10.81**॥

नमितायतविष्कम्भा दानवप्रभवैः क्षमा।
किञ्चिदुत्तम्भितेवाऽद्य कंसभारापहारतः॥ **10.82**॥

न खल्वतिशयं कञ्चिदियमाधातुमर्हति।
सुमणावज्ञकॢप्तेव स्तुतिरस्मत्कृता त्वयि॥ **10.83**॥

इति विज्ञापितस्तेन व्रीडादिव नतो विभुः।
बालोपलालनमिदं भव्यवृत्तिरभावयत्॥ **10.84**॥

स वाचा सान्त्वयामास पितरं दीनचेतसम्।
स्ववक्त्रेन्दुविनिष्यन्दिसुधापूरितकुल्यया॥ **10.85**॥

गम्भीरमधुरां तस्य गिरं निगमगन्धिनीम्।
श्रुत्वा मुक्तिसखीं प्राप मुदमानकदुन्दुभिः॥ **10.86** ॥

देवकी च परिष्वज्य सुतं वात्सल्यनिर्भरा।
नन्दगोपवधूलब्धं नवमानन्दमन्वभूत्॥ **10.87** ॥

भूयः प्रादुरभूत्तस्य भुजयुग्मं तिरोहितम्।
तथापि तादृशं मर्त्यं तममन्यन्त तामसाः॥ **10.88** ॥

बभूव बलभद्रस्य तेन विश्वातिशायिना।
शिरसा विधृतस्यापि किरीटस्येव शेषता॥ **10.89** ॥

क्रियमाणपरिष्कारः किरीटाद्यैः स बन्धुरैः।
तानि तान्येव दिव्यानि तत्तदङ्गैरभूषयत्॥ **10.90** ॥

अशोभत शुभं छत्रं तस्य राजन्यलक्षणम्।
तन्नाभिपुण्डरीकस्य रूपान्तरमिवोदितम्॥ **10.91** ॥

चामरद्वितयं शौरेः समया मुखपङ्कजम्।
शुशुभे सप्रतिच्छन्दो हंसमूर्तिरिव स्वयम्॥ **10.92** ॥

स चन्द्र इव सम्पूर्णः प्रथमो यदुभूभृताम्।
पुनरुन्निद्रयामास कीर्तिं कुमुदिनीमिव॥ **10.93** ॥

अभजन्त द्विजेन्द्रास्तमतद्भोगपराङ्मुखाः।
सर्गाधिकारान्निर्वाप्य शान्ता इव पितामहाः॥ **10.94** ॥

अहार्यान् यदुवंशस्य स भोगान्समकल्पयत्।
स्वपर्यङ्कभुजङ्गस्य फणामणिगणानिव॥ **10.95** ॥

अमरत्वाय पर्याप्तं तन्मुखेन्दुसमुद्भवम्।
सुधेव परिवारेभ्यः सस्वदे सूनृतं वचः॥ **10.96** ॥

प्रार्थितोऽपि स राज्याय प्रभावज्ञैर्यदूत्तमैः।
अरोचयत राजानमुग्रसेनं वयोधिकम्॥ **10.97** ॥

न्यस्तरक्षाभरो राज्ञा यौवराज्यमुपाश्रितः।
शुशुभे पारतन्त्र्येण स्वातन्त्र्यवशवर्तिना॥ **10.98** ॥

तस्य गोपायतः पृथ्वीं गोपालकुहनात्यजः।
पर्युपास्त पदं धन्या पार्थिवश्रीरनुत्तमा॥ **10.99** ॥

कृतवीराभिषेकं तं क्लृप्तकल्याणकौतुकम्।
तुष्टुवुः समये वेदाः सौस्नातिकपुरस्कृताः॥ **10.100** ॥

शक्तिभिस्तिसृभिर्दीप्तो विवस्वानिव दीप्तिभिः।
स्वपदं पृथिवीं चक्रे सुहृद्भिः सूरिभिर्वृतः॥ **10.101** ॥

विक्लृप्तं तस्य बर्हाद्यं हेमरत्नविभूषणैः।
वैरोचनिहृतानीतः किरीटो न व्यकल्पत॥ **10.102** ॥

सप्तिभिः सैन्यसुग्रीवमेघपुष्पवलाहकैः।
व्यक्तिमन्तोऽभवन्वेदास्त्यजन्तो धेनुभूमिकाम्॥ **10.103** ॥

पद्माकमलदायादं पदं तस्य स्वमौलिभिः।
श्रुतयो धारयामासुः पादपीठीकृतात्मभिः॥ **10.104** ॥

स वेणुः शङ्खरूपेण प्राचा परिपचेलिमः।
अगोपीसंविभागार्हं पपौ तस्याधरामृतम्॥ **10.105** ॥

दिदेश सान्दीपनये धनुर्वेदोपदेशिने।
स्वपदारूढतनयप्रत्यानयनदक्षिणाम्॥ **10.106** ॥

प्रहितां पुरुहूतेन स्वसङ्कल्पानुवर्तिना।
कंसजित्कंसपितरं सुधर्मामध्यवासयत्॥ **10.107** ॥

अशेषरत्नचित्रां तामतीतस्तुतिगोचराम्।
अद्वैतमिव सर्वेषामद्भुतानाममन्यत॥ **10.108** ॥

स च तस्यानुभावेन निध्यातनयपद्धतिः।
प्रजापालनधर्मस्य पारदृश्वतमोऽभवत्॥ **10.109** ॥

कृष्णपक्षमपि प्राप्य स राजा विश्वरञ्जकः।
प्रापद्यत परां वृद्धिं सुमनःस्वादनक्षमाम्॥ **10.110** ॥

मलिनैः सततासारैः मन्त्रिभिः चपलान्वितैः।
विमुक्तः स बभौ भास्वान् मेघैरिव जलाश्रयैः॥ **10.111** ॥

प्रचितं बहुभिस्तीर्थैः तस्य गूढं चिकीर्षितम्।
सारस्वतमिव स्रोतः स्थानेस्थाने व्यजृम्भत॥ **10.112** ॥

मानसंरक्षकस्तस्य मन्त्रस्तर्क इवानयः।
अङ्गपञ्चकसम्पत्त्या विपक्षे दण्डतां ययौ॥ **10.113** ॥

स्वतः शुद्धां यथास्थानं रोषरागवतीं धियम्।
स दधे यमुनाशोणशबलामिव जाह्नवीम्॥ **10.114** ॥

सप्तभिः सामदानाद्यैरुपायैः स्थानपातिभिः।
द्विनवद्वीपसम्भूतं रत्नजातमजीहरत्॥ **10.115** ॥

अनुगन्ता स्वनेतृणामुदये विश्वरञ्जकः।
दूरीकृततमाः सोऽभूत् द्वितीय इव भानुमान्॥ **10.116** ॥

सञ्चितस्य धनौघस्य स्थानसञ्चारणेन सः।
तटाकस्येव पूर्णस्य परीवाहमकल्पयत्॥ **10.117** ॥

आसागरान्तमवमत्य महीपतीन्द्रान्
भूम्ना निजेन परिहृत्य ययातिशापम्।

ओजोनिरोधकमिलाश्रयमुग्रसेनं
राजानमेकमकरोज्जगदेकनाथः ॥ **10.118** ॥

क्षिप्तावद्यं क्षत्रियवृत्त्या बहुशाखं
मग्नं शापोदन्वति मान्यं यदुवंशम्।
इच्छाधीनस्वेतरसर्वः स्वमहिम्ना
रक्षागोपो रामयवीयानुदहार्षीत् ॥ **10.119** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
यादवाभ्युदये महाकाव्ये दशमः सर्गः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥